श्रामं त्रितुषमित्युक्तं स्विन्नमन्नमुदाहृतम् ॥”
इति स्मृतिः ॥

ग्राम्यशस्यानि यथा,—
“व्रीहयश्च यवाश्चैव गोधूमाश्चाणवस्तिलाः ।
प्रियङ्गवो ह्युदाराश्च कोरदूषाः सचीनकाः ॥”
उदाराः दीर्घशालयः ।
“माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ।
आढ़क्यश्चणकाश्चैव शाणाः सप्तदश स्मृताः ॥
इत्येता ओषधीनान्तु ग्राम्याणां जातयो मुने ॥”
ग्राम्यारण्यशस्यानि यथा,—
“ओषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश ।
व्रीहयश्च यवा माषा गोधूमाश्चाणवस्तिलाः ॥
प्रियङ्गुसप्तमा ह्येते अष्टमास्तु कुलत्थकाः ।
श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ॥
तथा वेणुयवाः प्रोक्तास्तथा मर्कटका मुने ।
ग्राम्यारण्याः स्मृता ह्येता ओषध्यस्तु चतुर्दश ॥”
इति विष्णुपुराणे १ अंशे ६ अध्यायः ॥*॥

नवशस्यसम्भोगनक्षत्राणि यथा,—
“अनुराधा मृगशिरो रेवती चोत्तरात्रयम् ।
हस्ता चित्रा मघा पुष्या श्रवणा च पुनर्व्वसुः ॥
रोहिणी नवशस्यादिनवद्रव्याशनादिषु ।
प्रशस्तं नवपीठादिसम्भोगं शङ्कविद्वदेत् ॥”*॥

नवशस्यश्राद्धादिकालो यथा,—
“शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥”
इत्यनेन शरद्वसन्तविहितनवशस्येष्टेः ।
“श्यामाकैर्व्रीहिभिश्चैव यवैरन्योन्यकालतः ।
प्राग्यज्ञं युज्यतेऽवश्यं न त्ववाश्रयणात्ययः ॥”
इति कालान्तरदर्शनात् श्राद्धेऽपि तथा ।
आग्रयणं नवशस्येष्टिः ।
“वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधैः ।
अपरे क्रियमाणं हि धनुष्येव कृतं भवेत् ॥
धनुषि यत् कृतं श्राद्धं मृगनेत्रासु रात्रिषु ।
पितरस्तस्य गृह्णन्ति नवान्नामिषकाङ्क्षिणः ॥”
अपरे कृष्णपक्षे ।
“पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः ।
भवेत् जन्मान्तरे रोगी पितॄणां नोपतिष्ठते ॥
यद्यपि व्रीहिपाके च यवपाके च पार्थिव ।
न तावन्तो महाराज विना श्राद्धं कथञ्चन ॥”
इति विष्णुधर्म्मोत्तरवचने श्राद्धं प्रति व्रीहियवपाकयोर्निमित्तत्वं प्रतीयते । तथापि नवोदके नवान्ने च इति शातातपवचने पूर्व्वोक्तवहुषु वचनेषु च नवान्नस्य श्रुतेर्नवान्नत्वेनैवोभयसाधारणं निमित्तं लाघवात् । अभिलापवाक्ये नवान्नागमनिमित्तमिति नियोज्यम् । न तु यवागमादि । वृश्चिके शुक्लपक्षे च इति तु धनुरादिपर्य्युदस्तेतरगौणकालमध्ये वृश्चिकस्य प्राशस्त्यमात्रार्थं न तु श्राद्धान्तरार्थमिति । इति मलमासतत्त्वम् ॥ अन्यत् नवान्नशब्दे द्रष्टव्यम् ॥

शस्यध्वंसी, [न्] पुं, (शस्यानि ध्वंसयतीति । ध्वंस + णिनिः ।) तुम्बुरुः । इति शब्दचन्द्रिका ॥ शस्यनाशके, त्रि ॥

शस्यमञ्जरी, स्त्री, (शस्यस्य मञ्जरी ।) अभिनवनिर्गतधान्यादिशीर्षकम् । शीष इति भाषा ॥ तत्पर्य्यायः । कणिशम् २ । इत्यमरः ॥ कणिशः ३ कणिषः ४ । इति तट्टीका ॥

शस्यशूकं, क्ली, (शस्यस्य शूकम् ।) शस्यस्य तीक्ष्णाग्रम् । शुङा इति भाषा । तत्पर्य्यायः । किंशारुः २ । इत्यमरः ॥

शस्यसम्बरः, पुं, सालवृक्षः । इत्यमरः ॥

शस्याद्, त्रि, शस्यभक्षकः । शस्यं अत्ति इत्यर्थे अदधातोः कर्त्तरि क्विप्प्रत्ययेन निष्पन्नमेतत् । इति मुग्धबोधव्याकरणम् ॥

शस्यारः, पुं, क्षुद्रशमीवृक्षः । इति शब्दरत्नावली ॥

शांशपः, पुं, शिंशपाया विकारश्चमसः । शिंशपाशब्दादण्प्रत्यये इकारस्य आकारादेशेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शांशपायनः, पुं, मुनिविशेषः । इति पुराणम् ॥ (यथा, विष्णुपुराणे । ३ । ६ । १९ ।
“काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः ॥”)

शाकं, क्ली, पुं, (शक्यते भोक्तुमिति । शक + घञ् ।) पत्रपुष्पादि । साग इति हिन्दीभाषा । तत्पर्य्यायः । हरितकम् २ शिग्रुः ३ । इत्यमरः ॥ शिघ्रुः ४ । इति तट्टीका ॥ हारितकम् ५ इति शब्दरत्नावली ॥ अथ शाकवर्गः । तत्र शाकनिरूपणम् ।
“पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यात् यथोत्तरम् ॥”
अथ शाकानां गुणाः ।
“प्रायःशाकानि सर्व्वाणि विष्टम्भीनि गुरूणि च
रूक्षाणि बहुवर्च्चांसि सृष्टविण्मारुतानि च ॥
शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं
वर्णं विनाशयति रक्तमथापि शुक्रम् ।
प्रज्ञाक्षयञ्च कुरुते पलितञ्च नूनं
हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ॥
शाकेषु सर्व्वे निवसन्ति रोगाः
सहेतवो देहविनाशनाय ।
तस्माद्बुधः शाकविवर्ज्जनञ्च
कुर्य्यात्तथाम्लेषु स एव दोषः ॥”
इति भावप्रकाशः ॥
अपि च ।
“सर्व्वशाकमचाक्षुष्यमलक्ष्ययमसैथुनम् ।
ऋते पटोलवास्तूकक्वाकमाचीपुनर्नवाः ॥”
इति राजवल्लभः ॥

शाकः, पुं, वृक्षविशेषः । सेगोन् इति भाषा । तत्पर्य्यायः । शाकवृक्षः २ शाकाख्यः ३ खरपत्रः ४ अर्ज्जुनोपमः ५ । इति रत्नमाला ॥ ककचपत्रः ६ शरपत्रः ७ अतिपत्रः ८ अहिदलः ९ श्रेष्ठकाष्ठः १० स्थिरसारः ११ गृहद्रुमः १२ । अस्य गुणाः । सारकत्वम् । पित्तदाहश्रमापहत्वञ्च । अस्य वल्कलगुणाः । कफनाशित्वम् । मधुरत्वम् । रूक्षत्वम् । कषायत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ शक्तिः । इति मेदिनी ॥ शिरीषवृक्षः । इति शब्दरत्नावली ॥ नृपभेदः । इति विश्वः ॥ द्वीपविशेषः । तस्य विवरणं यथा,—

सूत उवाच ।
“शाकद्वीपस्य वक्ष्यामि यथावदिह निश्चयम् ।
कथ्यमानं निबोधध्वं शाकद्वीपं द्विजोत्तमाः ॥
जम्बुद्वीपस्य विस्ताराद्द्विगुणस्तस्य विस्तरः ।
विस्ताराद्द्विगुणश्चापि परिणाहः समन्ततः ॥
तेनावृतः समुद्रोऽयं द्वीपेन लवणोदधिः ।
तत्र पुण्या जनपदाश्चिराच्च म्रियते जनः ॥
कुतएव च दुर्भिक्षं क्षमातेजोयुतेष्विह ।
तत्रापि पर्व्वताः शुभ्राः सप्तैव मणिभूषिताः ॥
शाकद्वीपादिद्वीपेषु सप्त सप्त नगाश्चिषु ।
ऋज्व्वायताः प्रतिदिशं निविष्टा वर्षपर्व्वताः ॥
रत्नाकराद्रिनामानः शोभावन्तो महाचिताः ।
समाचिताः प्रतिदिशं द्वीपविस्तरमानतः ॥
उभयत्रावगाढ़ाश्च लवणक्षीरसागरौ ।
शाकद्वीपे तु वक्ष्यामि सप्त दिव्यान् महाचलान् ॥
देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते ।
प्रागायतः स सौवर्ण उदयो नाम पर्व्वतः ॥
तत्र मेघास्तु वृष्ट्यर्थं प्रभवन्ति च यान्ति च ।
तस्यापरेण सुमहान् जलधारो महागिरिः ॥
सैव चन्द्रः समाख्यातः सर्व्वौषधिसमन्वितः ।
तस्मान्नित्यमुपादत्ते वासवः परमं जलम् ॥
नारदो नाम सैवोक्तो दुर्गशैलो महाचितः ।
तत्राचले समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ ॥
तस्यापरेण सुमहान् श्यामो नाम महागिरिः ।
यत्र श्यामत्वमापन्नाः प्रजाः पूर्व्वमिमाः किल ॥
स एव दुन्दुभिर्नाम श्यामः पर्व्वतसत्तमः ।
शब्दमृत्युः पुरा तस्मिन् दुन्दुभिस्ताड़ितः सुरैः ॥
रत्नज्वालान्तरमयः शाल्मलश्चान्तरालकृत् ।
तस्यापरेण रजतो महानस्तो गिरिः स्मृतः ॥
सैव सोमक इत्युक्तो देवैर्यत्राहृतं पुरा ।
सम्भृतञ्च हृतञ्चैव मातुरर्थे गरुत्मता ॥
तस्यापरे चाम्बिकेयः सुमनाश्चैव स स्मृतः ।
हिरण्याक्षो वराहेण तस्मिन् शैले निषूदितः ॥
आम्बिकेयात् परो रम्यः सर्व्वौषधिसमन्वितः ।
विभ्राजस्तु समाख्यातः स्फाटिकः स महागिरिः ॥
यस्माद्विभाजते नित्यं विभ्राजस्तेन स स्मृतः ।
सैवेह केशवेत्युक्तो यतो वायुः प्रवायति ॥
तेषां वर्षाणि वक्ष्यामि पर्व्वतानां द्विजोत्तमाः ।
शृणुध्वं नामतस्तानि यथावदनुपूर्व्वशः ॥
द्विनामान्येव वर्षाणि यथैव गिरयस्तथा ।
उदयस्योदयं वर्षं जलधारेति विश्रुतम् ॥
नाम्ना सान्तभयन्नाम वर्षं तत् प्रथमं स्मृतम् ।
द्वितीयं जलधारस्य सुकुमारमिति स्मृतम् ॥
तदेव शैशिरं नाम वर्षं संपरिकीर्त्तितम् ॥
रैवतस्य तु कौमारं तथैव च सुखोदयम् ।
श्यामपर्व्वतवर्षन्तु मणीचकमिति स्मृतम् ॥
आनन्दकमिति प्रोक्तं तदेव मुनिभिः शुभम् ।